| विषयाः | | पृष्ठे |
|---|---|---|
| ५९ । | अथ इन्द्रनील परीक्षा ... ... | १२३ |
| ६० । | „ इन्द्रनील गुणाः, „ „ दोषाः ... ... | १२५ |
| ६१ । | „ „ मूल्यम् ... ... | १२७ |
| ६२ । | „ मरकत परीक्षा ... ... | १२७ |
| ६३ । | „ मरकत मणेश्छाया, „ मरकत मणेर्दोषगुणाः ... ... | १२९ |
| ६४ । | „ कृत्रिमाकृत्रिम परीक्षा ... ... | १३० |
| ६५ । | „ मरकत मूल्यम् ... ... | १३१ |
| ६६ । | „ पुष्पराग परीक्षा ... ... | १३१ |
| ६७ । | „ कर्कैतनमणि परीक्षा ... ... | १३२ |
| ६८ । | „ भीष्ममणि परीक्षा ... ... | १३४ |
| ६९ । | „ पुलकमणि परीक्षा ... ... | १३४ |
| ७० । | „ रुधिराख्य परीक्षा ... ... | १३६ |
| ७१ । | „ स्फटिक लक्षणम् ... ... | १३६ |
| ७२ । | „ अयस्कान्त लक्षणम्, „ मिश्रक लक्षणम् ... ... | १३८ |
| ७३ । | „ शङ्ख लक्षणम्, अलङ्करणयुक्तिः ... ... | १३८ |
| ७४ । | „ अस्त्रयुक्तिः, „ अस्त्रगणनम् ... ... | १३९ |
| ७५ । | „ खड्ग परीक्षा ... ... ... | १४० |
| ७६ । | „ खड्गस्य शताङ्गगणनम् ... ... | १४१ |
| ७७ । | „ खड्गस्य चत्वारिरूपाणि ... ... | १४२ |
| ७८ । | „ खड्गस्य त्रिंशन्नेत्राणि ... ... | १४२ |
| ७९ । | „ खड्गस्य त्रिंशदरिष्टानि ... ... | १४३ |

| | विषयाः | | | पृष्ठे |
|---|---|---|---|---|
| ९९। | अथ हय क्रियाकालः,<br>,, हयारोहणज्ञानम्,<br>,, हय ताड़नविधिः | .. | ... | १९० |
| १००। | ,, ,, धावनविधिः | ... | ... | १९१ |
| १०१। | ,, ,, रक्तमोक्षणविधिः | ... | ... | १९२ |
| १०२। | ,, ,, ऋतुचर्य्या | ... | ... | १९३ |
| १०३। | ,, गज परीक्षा,<br>तत्रकालः | ... | ... | १९४ |
| १०४। | ,, गज गुणाः ... | ... | ... | २०० |
| १०५। | ,, गज दोषाः ... | ... | ... | २०२ |
| १०६। | ,, वृष परीक्षा ... | ... | ... | २०६ |
| १०७। | ,, वृष गुणाः ... | ... | ... | २०७ |
| १०८। | ,, वृष दोषाः ... | ... | ... | २०९ |
| १०९। | ,, महिष परीक्षा... | ... | ... | २१० |
| ११०। | ,, मृग परीक्षा ... | ... | ... | २११ |
| १११। | ,, सारमेय परीक्षा | ... | ... | २१३ |
| ११२। | ,, अज लक्षणम्... | ... | ... | २१४ |
| ११३। | ,, चतुष्पदयानोद्देशः | ... | ... | २१५ |
| ११४। | ,, द्विपदयानोद्देशः | ... | ... | २१६ |
| ११५। | ,, द्विपदयानकथनम् | ... | ... | २१८ |
| ११६। | ,, निच्छदिः ... | ... | ... | २२० |
| ११७। | ,, अष्टदोलाकथनम् | ... | ... | २२१ |
| ११८। | अथ निष्पद यानोद्देशः | ... | ... | २२३ |
| ११९। | अथ अस्य लक्षणानि | ... | ... | २२४ |
| १२०। | अथ विशेष निष्पद यानोद्देशः,<br>तत्र दीर्घा नौका लक्षणम् | ... | ... | २२५ |

इति सिंहासन-स्थानमिति राष्ट्रस्य मस्तकम्।
इतोऽन्ये चित्तहर्षार्थाः प्रासादाः पृथिवीभुजः॥ २९३॥
जलयन्त्रादयो * येऽन्ये तेषां नास्ति विनिश्चयः।
स्वजन्म-गेह-संस्थो यो नृपतिःशुभ-चेतनः॥ २९४॥
सचिरं(११) पृथिवीं शास्ति सर्व्वार्थान् साधयत्यपि।
योवा तत्पर-गेहस्थो दुर्म्मोहाद्धरणीपतिः।
न चिरं पाति वसुधां घोरं रोगञ्चविन्दति॥ २९५॥
स्वलग्न-पति-मित्रस्य गृहवारोनदुष्यति।
परञ्च,—
हीरकस्य † विशुद्धस्य ब्रह्मजातेर्म्महाद्युतेः।
सूर्य्यांशु-स्पर्शमात्रेण वमतोदीप्ति-मच्छिशाः॥ २९६॥
गृहाग्रे धारयेद्राजा तद्वज्रं वज्रधारणम्॥ ९९७॥
वास्तस्तु,—
गृहेषु मणि-विन्यासो विधेयः सद्मनोपरि।
तेन सर्व्वाणि नश्यन्ति अरिष्टानि महीभुजाम्॥ २९८॥

---

(११) सुषिरं इति (ग) पुस्तक पाठः।

---

* अत जलयन्त्रमिति यद् दृश्यते तदन्यत्राप्यस्ति। तथा च—

"भ्रमद्गचक्रं जलयन्त्रवद्वनम्" इति भास्करः।

"विलिप्तगात्रा जलयन्त्र-हस्ताः"।

"निशाः शशाङ्क-क्षत नील-राजयः
क्वचिद्विचित्रं जलयन्त्र (चन्द्र) मन्दिरम्"।

सूर्य्यसिद्धान्त-टीकाकृन्मते जलयन्त्रम् जलघटीयन्त्रम्। अन्ये तु सौधस्थितोत्सः, जलघटीयन्त्रमिति वा वदन्ति।

† हीरकस्य असंख्येया गुणा नामानि च तयोद्दश श्रूयन्ते। गरुड़पुराणोपपुराण-बृहत्संहिता-शुक्रनीति-प्रभृतिषु उत्पत्ति गुण-लक्षणानि तेषां सन्ति।

"अत्यन्त विशदं वज्रं तारकाभं कवेः प्रियम्।" इति शुक्रनीतिः।

लौहप्रदीपेऽपि।

निरङ्कं रूप्यपत्राभमोषन्मणिनिभञ्च यत्।
दुर्लभं तन्महामूल्यं कान्तलौहं प्रचक्षते॥ ७५॥
कृष्णाभूमिर्भवेत् स्वच्छा पीता वज्राङ्कसङ्कुता।
कृष्णवज्रमिति प्राहुस्तत्क्षते मोह उच्यते॥ ७६॥
प्रदीपेऽपि,—
कृष्णाभूमिं सुवर्णाभमोषच्छुक्लाङ्कसङ्कुतम्।
डाहुलीवज्रकं (१) विद्यात् कालसंज्ञमथापरे॥ ७७॥
अरुणं सूक्ष्ममूर्द्धेदङ्कं भूमिः सितेतरा।
अरुणाख्यमिदं वज्रं शत्रुदर्प-निसूदनम्॥ ७८॥
सूर्य्यांशुस्पर्शमात्रेण वह्निरूपां वमेच्छिखाम्।
तस्य स्पर्शनमात्रेण पद्मकोषः स्फुटेन्निशि॥ ७९॥
दुर्लभं तन्मनुष्याणां भाग्यैः कुत्रापि लभ्यते।
तद्योजनसहस्रस्य रिष्टं नाशयति ध्रुवम्॥ ८०॥
श्वेतास्तिस्रो यदा रेखा आमूलादुपलक्ष्यते।
श्वेताङ्कमिति तद्विद्याद्यशोलक्ष्मीवल-प्रदम्॥ ८१॥
अम्भोजदलसङ्काशं अङ्कं भूमिः सितेतरा।
अम्भोज वज्रं तज्ज्ञेयं कथितं मुनिपुङ्गवैः॥ ८२॥
अङ्कं यस्य गदाकारं भूमिश्चैव सितेतरा।
गदावज्रमिदं ब्रूयात् तत्क्षते शूल-सम्भवः॥ ८३॥
अङ्कं कृष्ण-तिलाकारं भूमिश्चैव सिताऽसिता।
तिलवज्रमिदं ज्ञेयं लक्ष्मीवलयशःप्रदम्॥ ८४॥
तत्क्षते तिलतैलाभा वसा प्रच्यवतेऽधिकम्॥ ८५॥

(१) कट्टुकं इति (क) पुस्तक पाठः।

ललाटमध्ये यस्यैव दृश्यते येन भूभुजा ।
... ... ... ... ... ततो मुणीन्द्राः * ॥ ९५ ॥

शश्वन्मदस्रुति-परिप्लुतगण्डदेशा,-
स्तीच्णाङ्कुशेन विनिवारयितुं न शक्याः ।
ज्ञातिद्विषो नवपयोद(ध)रवा गभीराः ;
पृथ्वीभुजां सकलसौख्यकरा भवन्ति ॥ ९६ ॥

अथ दोषाः ।

दीनःचीणोऽथ विषमो विरूपो विकलः खरः ।
विमदो धापकः काको धूम्रो जटिल इत्यपि ॥ ९७ ॥
अजिनो मण्डलो खिन्नो हतावर्त्तो महाभयः ।
राष्ट्रहा मुषलो भालो निःसत्त्व (१) इति विंशतिः ॥
महादोषाः समाख्याता गजानां भोजभूभुजा ॥ ९८ ॥

तद्यथा ।

अतिचीणतरः चीणतनुदन्तोऽतिनिष्प्रभः ।
दीनाख्यः कुरुते दीनं भूभुजं नात्र संशयः ॥ ९९ ॥
खर्व्वंशुण्डो महापुच्छो निश्वासो वेगवर्ज्जितः ।
चीणोऽयं कुरुते चीणं स्वामिनं धनसम्पदा ॥ १०० ॥
कुम्भे दन्तेऽच्चिकर्णे च वैषम्यं पार्श्वयोस्तथा ।
यस्यायं विषमो नागो नागवत् कुरुते चयम् ॥ १ ॥
आस्कन्धात् तु शिरः चीणं पश्चाद्भागस्य पुष्टता ।
विरूप इति नागोऽयं कुरुते भूधनच्चयम् ॥ २ ॥
नानाभोगैरपि क्रतैर्यस्य नो जायते मदः ।
युद्धाय नोपक्रमते विकलं तं विवर्ज्जयेत् ॥ ३ ॥

(१) निषिद्ध इति (क) पुस्तक पाठः ।

* अत्र ग्रन्थांशः किञ्चित् पतित इति मन्ये ।

